श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।

वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ आरम्भस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ आरम्भस्तबकः ॥

लक्ष्मीचरणराजीवलाक्षालक्षितवक्षसे।
विश्वसर्गादिलीलाय वेङ्कटब्रह्मणे नमः॥ १ ॥

असदृशमरुणाब्जदृशं प्रस्विन्नपयोधर स्फुरन्मूर्त्तिम्।
मनसि दधीमहि सततं मातारं मातरं च लोकानाम्॥ २ ॥

प्रातरम्बुजविडम्बिलोचनां मातरं त्रिजगतामुपास्महे।
शीतरम्यकरुणावलोकनैर्या तरङ्गयति मङ्गलानि नः॥ ३ ॥

आचक्रायुधमा च मामकगुरोराचार्यवर्गं भजे
मध्यस्थैरिह नाथयामुनमुखैर्मान्यैः सनाथीकृतम्।
क्षीराम्भोधिसुतापयोधरपयःपूरा इवोदित्वरा
यद्वाचां विसरा जगन्ति नितरामुज्जीवयन्ति स्वयम्॥ ४ ॥

जलधिदुहितुः स्तुत्या सत्या सती मम भारती
रचयतु नमो वाचे प्राचेतसाननजन्मने।
भवदवभवं तापं लोपं नयन्त्यनया यया
भुवि सुलभतां नीता सीताचरित्रसुधाझरी॥ ५ ॥

पराशरमुनीशितुः प्रणतिकर्म कुर्मस्तराम्
अहीन गुण शोभितैरमृतसाधनोत्कण्ठिभिः।
यदीयकृतिसिन्धुना विमथितेन यत्नाद्बुधैः
प्रकाशमिह नीयते परम पूरुष प्रेयसी॥ ६ ॥

दद्यादद्य कुदृष्टिसर्पगरुडस्त्रय्यन्तविद्यागुरुः
श्रीमान् वेङ्कटनाथदेशिकमणिः श्रेयांसि भूयांसि मे।
दत्से दृष्टिलवेन देवि भजतां या त्वं विभुत्वं रमे
तस्या हन्त तवापि येन विभुता सुष्ठु प्रतिष्ठापिता॥ ७ ॥

शीतज्योतिः शिखरिनगरीसागराम्भोधरादेः
जल्पं जल्पं जलजनिलये हन्त मिथ्यासमृद्धिम्।
निर्विण्णा मे ननु भगवती भारतीयं त्वदीयं
स्तोत्रं चित्रं स्फुरति जननि स्वैरमारब्धुकामा॥ ८॥

मदान्ध क्षोणीपत्यपसद मनः प्रीणन कृते
नमस्कारं ब्रूमो भगवति चमत्कारवचसे।
विधात्रीमानन्दं विपुलमिह चामुत्र च तव
स्तुतिं प्रस्तौत्वंहोभरनिरसनायाद्य रसना॥ ९॥

तत्तादृग्रचनाविदग्धरसनाकण्डूतिनिर्धूतये
केचिन्नीचविचारगोचरगिरो ग्रथ्नन्तु मिथ्याकृतीः।
स्वं वाग्ब्रह्म पुराणजिह्मगशिरः कम्पावहं पावनी
कर्तुं देवि वयं पुनस्तव कथारम्भाय जृम्भामहे॥ १०॥

शय्याशब्द गणानुशासन चणा छन्दोमयं वाहनं
सोदर्यस्तु कलानिधिस्तव रमे सूनुश्च वाणीपतिः।
तस्यास्ते पुरतः स्तवं मितमतिः प्रोज्जृम्भितं श्रावयन्
गुञ्जाविक्रयिणः श्रयामि पदवीं माणिक्यपुञ्जापणे॥ ११॥

कवीनां प्रत्नानां कबळित सुधास्वादिममदैः
अनूचानैः स्तोत्रैः श्रुतिजडिमभाजो जननि ते।
अजामित्वायैव स्तवमिममकूपारतनये
वियाता ग्रथ्नीमो विहसनपदैः कैरपि पदैः॥ १२॥

विद्वद्भ्यः स्वदमानयात्मकृतया विश्वाम्ब नाधीयते
स्तुत्या ते सुखमज्ञचेतसि दृषत्प्राये न दूये ततः।
गान्धर्वी हि पुरन्दरादिशिरसामान्दोलयित्री चिरं
गीतिः सा बधिरान्न नन्दयति चेत्किं छिन्नमेतावता॥ १३॥

वक्तुं नैव चतुर्विधा श्रुतिरसावीष्टे न चाष्टश्रुतिः
नो चक्षुः श्रुतिरप्यहो तव गुणान् नारायणप्रेयसि।

स्तोतुं त्वामपि तामहं व्यवसितो दूरं हनूमन्मुखैः
दुर्लङ्घ्यं जलधिं तरीतुमनसः पङ्गोर्दधे चापलम्॥ १४॥

गर्वद्दुर्वसुधापतिस्तुतिपरव्याहारकूपान्धता
निर्विण्णाशय एष वेङ्कटकविः पङ्केरुहावासिनि।
अद्य त्वद्गुणवर्णनामृतरसैरानन्दितुं जृम्भते
चिञ्चापर्णरसावसन्नरसनः पुण्ड्रेक्षुसारैरिव॥ १५॥

नाहं जाने नवरसगतीर्नार्थमुक्षुण्णमन्यैः
नालङ्कारानपि न च वचोगुम्फगम्भीरिमाणम्।
स्तोतुं मातस्तदपि भवतीं त्यक्तलज्जो यतेऽहं
मन्तुं किं तु प्रथितकरुणा क्षन्तुमर्हस्यमुं त्वम्॥ १६॥

चक्षुष्मन्तश्चरणकमले चक्षुषा श्रोत्रवन्तः
श्रोत्रे भूमेर्जलधितनये जन्मवन्तोऽपि न स्मः।
वक्त्राण्यासन् भगवति न षट् पञ्च चत्वारि वा नः
कस्मादस्मान्न हसतु जनः स्तोष्यतस्त्वद्गुणौघम्॥ १७॥

अभूमिस्त्वद्भूमा जननि जरतीनामपि गिरां
असौ कस्मान्मादृक्कृशजनमनीषोक्तिविषयः।
अशक्यानामौर्वाग्निभिरपि निपीतुं निधिमपाम्
अपारं तं पातुं मशकशिशुकः किं प्रभवति॥ १८॥

प्रकृष्यन्तामस्मत्परमितरकाले विधिमुखा
वयं मातस्ते वा तव नुतिदशायां समधियः।
निकर्षोत्कर्षौ स्तां निशि तु शशिखद्योतमहसोः
दिवा को वा भेदो दिनकरकरव्रातजटिले॥ १९॥

वाग्भिः कोरकितानि ते रचयतः स्तोत्राणि वाणीपतेः
अस्माकं सुमितां स्तुतिं कलयतामप्यम्ब तुल्यं फलम्।
कौबेरीं श्रियमानशे बहुतरैः कश्चित्तपोभिश्चिरात्
एनामाशु कुचेल एव जगृहे धानाप्रदानादपि॥ २०॥

आसन् धन्यतमा गुणांस्तव बहूनास्वाद्य शक्रादयो
गृह्णन्तोऽपि गुणार्णवामृतकणान्मातः कृतार्था वयम्।
आचामन्ति सुधाझरान्सुमनसो द्वित्रांश्चकोराः कणा-
नेणाङ्कादविशेषमार्तिशमनं तत्रोभयेषामपि॥ २१ ॥

देवि श्रीवृषशैलदेवदयिते दाक्षिण्यपण्यक्षिते
मातः साहसतस्तव स्तवमिमं कर्तुं प्रवृत्तस्य मे।
उन्मीलन्तु परं गिरस्तव करालङ्कारपङ्केरुहात्
प्रेङ्खत्तुङ्ग षडङ्घ्रि सङ्घ विसरज्झङ्कारशङ्काकृतः॥ २२ ॥

पद्यानां दशभिर्यदस्तुत शतैस्त्वत्प्रेयसः पादुकां
त्रय्यन्तार्यकविः परो हयमुखस्तत्राम्ब ! को विस्मयः।
स्तोकप्रज्ञमतीव मूकमपि मां श्लोकैः सहस्रेण ते
स्तोतारं समवेक्ष्य सूक्ष्ममतिभिः कस्मान्न विस्मीयते॥ २३ ॥

मन्ये सत्स्वपि वाङ्मयेषु विदुषामन्येषु धन्यैर्बुधैः
उक्तिर्मे भुवि देवि तावकगुणस्पर्शादुपादीयते।
भद्रे त्वद्भ्रमणप्रशस्तचरणद्वन्द्वैकसंसर्गतो
भर्गः स्वर्गधुनीं बिभर्ति शिरसा भूयस्सु सत्स्वम्बुषु॥ २४ ॥

तव स्तोत्रे मन्दाः कतिचिदतिचित्रेऽपि कमले
न विन्दन्त्यानन्दं यदि तदपि न म्लायति मनः।
सृजेदेव स्रष्टा स किल विपुलेऽस्मिन् क्षितितले
चमत्कारानन्दानुभवचतुरान् द्वित्रिचतुरान्॥ २५ ॥

सुचारुमधुमोचिकारसमुचो वचोदेवता
कुचामृतकचाकचिप्रचुरचातुरीमेदुराः।
नराः सततमिन्दिरागुणकथासुधादोहिनीः
उपाध्वमिह वेङ्कटाध्वरिकवेरुदारा गिराः॥ २६ ॥

स्वैरं प्ररोहयतु पद्यसहस्रमाशु
दासस्य मे वदनसीम्नि तवावलोकः।

यः क्वापि हन्त सकृदञ्जलिबन्धभाजि
    जन्तौ जगज्जननि सौति सहस्रमक्ष्णाम्॥ २७ ॥

पङ्कजनिलये स्तोत्रं वेङ्कटकविगीतमेतदविगीतम्।
किङ्करकृतमिति कृपया त्वं कलयितुमर्हसि प्रसीदन्ती॥ २८ ॥

रसिकालिभिरास्वाद्यं रम्यं श्रीकरविलसदलङ्करणम्।
विकसतु सूर्यालोकात्पद्मं सहस्रं सहस्रपत्रमिव॥ २९ ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे आरम्भस्तबकः ॥